तदीयभगणादिकमुच्यते "युग्मयुग्मशरनागलोचनव्यालषण्णवयमाश्विनोऽसृजः" ९६८२८५२२ सि०शि० ।
कल्पे एतावन्तः कुजस्य भगणाः अस्योपत्त्यादिकं ग्रहभगणशब्दे दर्शयिष्यते । तस्य चलोच्चभगणमानञ्च तत्रैवोक्तम् "अर्कशुक्रबुधपर्य्यया विधेरह्नि कोटिगुणिता रदाब्धयः ४३२००००००० । एतएव शनिजीवभूभुवां कीर्त्तिताश्च गणकैश्चलोच्चकाः" तत्पातस्य भगणास्तत्रैवोक्ताः "कुभृद्रसाश्विनः" २६७, तस्य मन्दकेन्द्रभगणमानं निबन्धे "खरामाश्व्यहिद्व्यष्टषड्गोद्विदस्राः" २२९६८२८२३० । "शीघ्रकेन्द्रभगणाः" गजाद्रिमनुसप्तेन्दुत्र्यश्विखाश्विमिताः" २०२३१७-१४७८, । तस्य कक्षामानम् श्रीपतिनोक्तं यथा "अष्ट्यङ्कषण्मनुगजाः क्षितिनन्दनस्य" ८१४६९१५ योजनानि-मध्यमकुजस्फुटीकरणम् सि०शि०प्रमि०दर्शितं यथा "दिनगणार्धमथो गुणसंगुणं द्युगणसप्तदशांशविवर्जितम् । लवकलादिफलद्वयसंयुतः क्षितिसुतध्रुवकः क्षितिजो भवेत्" सि०शि० । "अत्रोपपत्तिः । दिनगणार्द्धं भागा इति प्रत्यहं त्रिंशत् कला गृहीताः । तत् पृथक् त्रिगुणं जातम् एताः कलाः पूर्वकलामिश्रीकृता जाताः । एतत् कुजगतेरधिकमतोऽतः कुजगतिं विशोध्य शेषम् । अनेन सप्तदशगुणेनैका कला भवति । अत उक्तं द्युगणसप्तदशांशविवर्जितमिति । पूर्वफलेन भागादिनाऽनेन च कलादिना भौमध्रुवक३३७०युक्तः कुजो भवति । यतोऽयमहर्गणोऽर्काब्दान्तादूर्ध्वमतस्तदुत्थं फलं रविमण्डलान्तिके योज्यमित्युपपन्नम्" प्रमि०
कुजस्य ध्रुवकमानं "तत्रैवखाद्रिरामाग्नय":३३७०। तथाच कलेरारम्भे राशिचक्रस्थविकलाभ्यो ध्रुवकेण हीनतायां तत्काले ११ । २९ । ३ । ५० । राश्यादि कुजध्रुवकः तस्य मन्दशीघ्रपरिधी तत्रैव उक्तौ यथा
"मन्दोच्चनीचपरिधिस्त्रिलवोनशक्र १४भागा रवेर्जिन २४कलोन३२रदा हिमांशोः । खाश्वा७० भुजङ्गदहना ३८अमरा३३भवाश्व११ पूर्णेषवो५० निगदिताः क्षितिजा-"दिकानाम् सि०शि०" इह ग्रहफलोपपत्त्यर्थं मन्दोच्चनीचवृत्तानि पूर्वैः कल्पितानि तेषां प्रमाणान्येतावन्तो भागाः । अत्रोपपत्तिः ग्रहस्य यन्त्रवेधविधिना यत् परमं फलमुत्पद्यते तस्य ज्या परमा फलज्या परमफलज्याऽन्त्यफलज्या चोच्यते । अन्त्यफलज्यातुल्यव्यासार्द्धेन यद्वृत्तमुत्पद्यते तन्नीचोच्चवृत्तम् । तत्परिधिस्त्रैराशिकेन । यदि त्रिज्यव्यासार्द्धे भांशाः परिधिस्तदान्त्यफलव्यासार्धे किमिति लब्धं परिधिभागाः । एवमर्कादीनां त्रिलवोनशक्रा इत्यादय उत्पद्यन्ते । अथ भौमादीनां चलपरिधीनाह" प्रमि० । "एषां चलाः कृतजिना२४४स्त्रिलवेन हीना दन्तेषवो ५३२वसुरसा६८वसुवाणदस्राः २५८ । पूर्णाब्धयो ४०ऽथ भृगुजस्य तु मन्दकेन्द्र--दोःशिञ्जिनी द्विगुणिता त्रिगुणेन भक्ता । लब्धेन मन्दपरिधीरहितः स्फुटः स्यात् तच्छीघ्रकेन्द्रभुजमौर्व्यथ वाणनिघ्नी । त्रिज्योद्धृताशुपरिधिः फलयुक् स्फुटः स्याद्भौमाशुकेन्द्रपदगम्यगताल्पजीवा । त्र्यंशोनशैल ७गुणितार्व ७युतस्य राशेर्मौर्व्योद्धृताप्तलवहीनयुतं मृदूच्चम् । भौमस्य कर्किमकरादिगते स्वकेन्द्रे लब्धांशकैर्विरहितः परिधिस्तु शैघ्र्यः" ।
भौमस्य भूमध्यादुच्छ्रितियोजनानि सि०शि०"गोकुरसञ्च षण्णवसूर्य्यसंख्याः"१२९६६१९ । तस्य कालांशाः शैलभुवः १७ । अस्य क्षेत्रं मेषवृश्चिकौ, उच्चं मकरः परमोच्चं मकरस्याष्टाविंशोऽंशः । नीचः कर्कटः तदीयाष्टाविंशोऽंशः सुनीचः । मूलत्रिकोणं मेषस्य दशमोंऽशः । रविचन्द्रजीवामित्राणि बुधोरिपुः, शुक्रशनी समौ । चतुर्थे अष्टमे चास्य पूर्णदृष्टिः । विषमराशिषु मेषमिथुनादिषु प्रथमपञ्चांशा अस्य त्रिंशाशाः समराशिषु वृषकर्कटादिषु शेषपञ्चांशा अस्य त्रिंशाशाः । अष्टोत्तरीयनाक्षत्रिकदशायां तस्य अष्टौ वर्षा दशाभोगकालः । विंशोत्तरीयनाक्षत्रिकदशायां तु सप्त वर्षाः । नक्षत्रकक्षायाम् अयं शनेरधस्तृतीयकक्षायां वर्त्तते, अयं रवितस्तृतीयवारेशः । अयं दक्षिणाशाधिपतिः अतस्तद्वारे दक्षिणदिग्गतिः प्रशस्ता । अयं पापग्रहः क्षत्रियवर्णः भारद्वाजगोत्रः अवन्तिदेशभवः मेषवाहनः चतुर्भुजः रक्तवर्णः । तस्य स्कन्दोऽधिदेवता पृथिवी प्रत्यधिदेवता । पूकने रक्तचन्दनं रक्तवस्त्रम् जवादिरक्तपुष्पं सर्ज्जरसयुक्तसिह्लकं धूपः, यावकं नैवेद्यं पूगं फलम् प्रवालं रत्नं रक्तवृषभो दक्षिणा । तस्य दौस्थ्योपशमनाय विप्राय रक्तवृषभं रक्तवस्त्रं प्रवालं दद्यात् स्वयं वा प्रवालं धारयेत् । अनन्तमूलं वा धारयेत् । होमे धूमकेतुरग्निः खादिरी समित् । कुजवारे दिवा२यामार्द्धे वारवेला ६षष्ठे कालवेला रात्रौ ३तृतीये कालवेला । अयं पुंग्रहः दक्षिणदिग्बली । अयं रजोगुणप्रकृतिः, तिक्तरसाप्रधानः सामवेदाधिपः तरुणमूर्त्तिः पैत्तिकः कृशमध्यः । अस्य राशिभोगकालः ४५दिनानिऽजन्मराशितः षष्ठे तृतीये